सुदुर्जयोऽभवतां तौ तु पुनर्जातौ महाबलौ ।
पुलस्त्यस्य कुले देव ! राक्षसेन्द्रावरी च तौ ॥
तयोस्तु पादविन्यासमसहन्तो जनार्दन ! ।
तवान्तिकमनुप्राप्तौ दशास्यकुम्भकर्णयोः ॥”
इति वह्निपुराणे वैश्रवणवरप्रदाननामाध्यायः ॥
तदुत्पत्त्यादि यथा,—
“दित्याः पुत्त्रद्वयं जज्ञे कश्यपादिति नः श्रुतम् ।
हिरण्याक्षश्च दुर्द्धर्षो हिरण्यकशिपुस्तथा ॥
कश्यपस्याश्रमोऽप्यासीत् पुण्ये वै पुष्करे पुरा ।
ऋषिभिर्देवताभिश्च गन्धर्व्वैरुपशोभितः ॥
आसनान्युपकॢप्तानि काञ्चनानि तु पञ्च वै ।
ऋषीणामृत्विजां ते वै उपविष्टा यथाक्रमात् ॥
होतुस्तत्रासनं यत्तु हविस्तत्राथ जुह्वतः ।
अन्तर्व्वत्नी दितिश्चैव पत्नी च समुपागता ॥
दशवर्षसहस्राणि गर्भस्तस्यामवर्त्तत ।
स तु गर्भो विनिःसृत्य मातुर्वै उदरात्तदा ॥
निषसादासने गर्भः कश्यपस्यापि सन्निधौ ।
तं दृष्ट्वा मुनयस्तस्य नामाकुर्व्वंस्तदृद्धितम् ।
हिरण्यकशिपुस्तस्मात् कर्म्मणानेन स स्मृतः ।
हिरण्याक्षोऽनुजस्तस्य सिंहिका च तथानुजा ।
राहोः सा जननी देवी विप्रचित्तेः परिग्रहः ।
हिरण्यकशिपुर्दैत्यश्चकार परमं तपः ।
ततो वर्षसहस्राणि निराहारो ह्यधःशिराः ॥
तं ब्रह्मा छन्दयामास दैत्यं तुष्टो वरेण तु ।
सर्व्वामरत्वं वव्रे स शस्त्रास्त्रैर्न दिवा निशि ॥
अहं सर्व्वं विनिर्जित्य सर्व्वदेवत्वमास्थितः ।
अणिमादिगुणैश्वर्य्यमेष मे दीयतां वरः ॥
तेनैवमुक्तो ब्रह्मा तु तस्मै दत्त्वा यथेप्सितम् ।
दत्त्वा चास्य सभां दिव्यां तत्रैवान्तरधीयत ॥
हिरण्यकशिपुर्दैत्यः श्लोकैर्गीतः पुरातनः ॥
राजा हिरण्यकशिपुर्दैत्यो यां यां निषेवते ।
तस्यां तस्यां नमश्चक्रुर्देवता ऋषिभिः सह ॥
एवं प्रभावो दैत्योऽभूत् हिरण्यकशिपुः पुरा ॥
स्वयमग्निश्च सूर्य्यश्च वायुरिन्द्रो जलं स्वयम् ।
भूत्वा चकार राज्यं स मन्वन्तरचतुर्दश ॥
तस्यासीत् नरसिंहस्तु मृत्युर्विष्णुः पुरा किल ।
नखैस्तेन विनिर्भिन्नो नार्द्रशुष्का नखाः
स्मृताः ॥
हिरण्याक्षसुताः पञ्च विक्रान्ताः सुमहाबलाः ।
हिरण्यकशिपोः पुत्त्राश्चत्वारः सुमहाबलाः ॥
प्रह्लादः पूर्व्वजस्तेषामनुह्लादस्तथैव च ।
संह्लादश्चैव ह्लादश्च ह्लादपुत्त्रान् शृणुष्व तान् ॥”
इति वह्निपुराणे कश्यपीयप्रजासर्गनामाध्यायः ॥

हिरण्यकशिपुहा, [न्] पुं, (हिरण्यकशिपुं हतवानिति । हन्+क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

हिरण्यकामधेनुः, स्त्री, (हिरण्यनिर्म्मिता कामधेनुर्यत्र ।) षोड़शमहादानान्तर्गतमहादानविशेषः । यथा,—
मत्स्य उवाच ।
“अथातः संप्रवक्ष्यामि कामधेनुविधिं परम् ।
सर्व्वकामदं नृणां महापातकनाशनम् ॥
लोकेशावाहनं तद्वद्धोमकार्य्याधिवासनम् ।
तुलापुरुषवत् कार्य्यं कुण्डमण्डपवेदिकम् ॥
स्वल्पेष्वेकाग्निवत् कुर्य्याद्गुरुरेकः समाहिताः ।
काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत् ॥
उत्तमा पलसाहस्रा तदर्द्धेन तु मध्यमा ।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता ।
शक्तितस्त्रिपलादूर्द्ध्वं अशक्तोऽपीह कारयेत् ॥
वेद्यां कृष्णाजिनं न्यस्य गुड़प्रस्थसमन्वितम् ।
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ॥
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम् ।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥
इक्षुदण्डाष्टकं तद्वत् नानाफलविभूषितम् ।
भाजनञ्चासनं तद्वत्ताम्रदोहनकं तथा ॥
कौषेयवस्त्रद्वयसंप्रयुक्तां
दीपातपत्राभरणाभिरामाम् ।
सचामरां कुण्डलिनीं सघण्टां
मणित्रिकां चन्द्रकरौप्यपादाम् ॥
रसैश्च सर्व्वैः पुरतोऽभिजुष्टां
हरिद्रया पुष्पफलैरनेकैः ।
अजाजिकुस्तुम्बुरुशर्कराभि-
र्व्वितानकञ्चोपरि पञ्चवर्णम् ॥
स्नानं ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य स पुष्पहस्तः ।
आवाहयेत् तां गुड़धेनुमन्त्रै-
र्द्विजाय दद्यादथ दर्भपाणिः ॥
त्वं सर्व्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम् ।
त्वद्दानशस्त्रशकलीकृतपातकौघः
प्राप्तोऽस्मि निर्व्वृतिमतीव परां नमामि ॥
लोके यथेप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः ।
संसारदुःखशमनाय यतस्व कामं
त्वां कामधेनुमिति वेदविदो वदन्ति ॥
आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेहजुष्टं
कन्यागणैः परिवृतः पदमिन्दुमौलेः ॥”
इति मात्स्ये हिरण्यकामधेनुप्रदानिको नाम २५३ अध्यायः ॥

हिरण्यकोषः, पुं, (हिरण्यस्य कोष इव ।) कृताकृतस्वर्णरूप्यम् । इति हेमचन्द्रः ॥

हिरण्यगर्भः, (हिरण्यं हैममयाण्डं गर्भं उत्पत्तिस्थानमस्य ।) ब्रह्मा । इत्यमरः । १।१।१६ ॥ हिरण्यं गर्भं उत्पत्तिस्थानमस्य हिरण्यस्य गर्भो भ्रूण इति वा हिरण्यगर्भः । एतस्याण्डं हिरण्यवर्णमभवत् । तथा च स्मृतिः ।
“हिरण्यवर्णमभवत्तदण्डमुदकेशयम् ।
तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भुरिति विश्रुतः ॥”
इति ।
उपचारात् हिरण्यवर्णमण्डं हिरण्यम् । इति भरतः ॥ अन्यच्च ।
“हिरण्यगर्भोऽभूद्ब्रह्मा तेन बुद्धिर्म्मता स्मृती ।”
इति देवीपुराणे देवीनिरुक्ते ४५ अध्यायः ॥ * ॥
षोड़शमहादानान्तर्गतद्वितीयमहादानम् । यथा,
मत्स्य उवाच ।
“अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम् ॥
पुण्यां तिथिं समासाद्य तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥
कुर्य्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः ।
पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम् ।
ब्राह्मणैरानयेत् कुण्डं तपनीयमयं शुभम् ॥
द्वासप्तत्यङ्गुलोच्छ्रायं हेमपङ्कजगर्भवत् ।
त्रिभागहीनं विस्तारमाज्यक्षीराभिपूरितम् ॥
दशास्त्राणि सरत्नानि दात्रं सूची तथैव च ।
हेमनालं सपिटकं बहिरादित्यसंयुतम् ॥
तथैवावरणं नाभेरुपवीतञ्च काञ्चनम् ।
पार्श्वतः स्थापयेत्तद्वद्धेमदण्डं कमण्डलुम् ॥
पद्माकारं पिधानं स्यात् समन्तादङ्गुलाधिकम्
मुक्तावलीसमोपेतं पद्मरागदलान्वितम् ॥
तिलद्रोणोपरिगतं वेदिमध्ये ततोऽर्च्चयेत् ।
ततो मङ्गलशब्देन ब्रह्मघोषरवेण च ॥
सर्व्वौषध्युदकं स्नानं स्नापितो वेदपुङ्गवैः ।
शुक्लमाल्याम्बरधरः सर्व्वाभरणभूषितः ।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥
नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः ॥
भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः ।
ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे ॥
नमस्ते भुवनाधार ! नमस्ते भुवनाश्रय ! ।
नमो हिरण्यगर्भाय गर्भे यस्य पितामहः ॥
यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥
एवमामन्त्र्य तन्मध्यमाविश्यास्य उदङ्मुखः ।
मुष्टिभ्यां परिसंगृह्य धर्म्मराजचतुर्मुखौ ।
जानुमध्ये शिरः कृत्वा तिष्ठेत श्वासपञ्चकम् ॥
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ।
कुर्य्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवः ॥
गीतमङ्गलघोषेण गुरुरुत्थापयेत्ततः ।
जातकर्म्मादिकाः कुर्य्यात् क्रियाः षोड़श
चापराः
सूच्यादिकञ्च गुरवे दत्त्वा मन्त्रमिमं जपेत् ॥
नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः ।
चराचरस्य जगतो गृहभूताय वै नमः ॥
मात्राहं जनितः पूर्व्वं मर्त्यधर्म्मा सुरोत्तम ।
त्वद्गर्भसम्भवादेष दिव्यदेहो भवाम्यहम् ॥
चतुर्भिः कलसैर्भूयस्ततस्ते द्विजपुङ्गवाः ।
स्नानं कुर्य्युः प्रसन्नाङ्गाः सर्व्वाभरणभूषिताः ॥
देवस्यत्वेति मन्त्रेण स्थितस्य कनकासने ।
अद्य जातस्य तेऽङ्गानि अभिषेक्ष्यामहे वयम् ॥
दिव्येनानेन वपुषा चिरं जीव सुखी भव ।
ततो हिरण्यगर्भस्तु तेभ्यो दद्याद्विचक्षणः ॥
ते पूज्याः सर्व्वभावेन बहुभ्यो वा तदाज्ञया ।
तत्रोपकरणं सर्व्वं गुरवे विनिवेदयेत ॥